# Shri Vaidyanatha Stotram

# શ્રીવૈદ્યનાથસ્તોત્રમ્

## Document Information

Text title : vaidyanAthastotram 06 22

File name : vaidyanAthastotram.itx

Category : shiva

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : Frm stotrArNavaH 06-22

Acknowledge-Permission: http://kshetrayaatra.blogspot.com

Latest update : July 27, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 11, 2021

*sanskritdocuments.org*

# શ્રીવૈદ્યનાથસ્તોત્રમ્

અચિકિત્સચિકિત્સાય આદ્યન્તરહિતાય ચ ।
સર્વલોકૈકવન્દ્યાય વૈદ્યનાથાય તે નમઃ ॥ ૧॥

અપ્રમેયાય મહતે સુપ્રસન્નમુખાય ચ ।
અભીષ્ટદાયિને નિત્યં વૈદ્યનાથાય તે નમઃ ॥ ૨॥

મૃત્યુઞ્જયાય શર્વાય મૃડાનીવામભાગિને ।
વેદવેદ્યાય રુદ્રાય વૈદ્યનાથાય તે નમઃ ॥ ૩॥

શ્રીરામભદ્રવન્દ્યાય જગતાં હિતકારિણે ।
સોમાર્ધધારિણે નિત્યં વૈદ્યનાથાય તે નમઃ ॥ ૪॥

નીલકણ્ઠાય સૌમિત્રિપૂજિતાય મૃડાય ચ ।
ચન્દ્રવહ્ન્યર્કનેત્રાય વૈદ્યનાથાય તે નમઃ ॥ ૫॥

શિખિવાહનવન્દ્યાય સૃષ્ટિસ્થિત્યન્તકારિણે ।
મણિમન્ત્રૌષધીશાય વૈદ્યનાથાય તે નમઃ ॥ ૬॥

ગૃધ્રરાજાભિવન્દ્યાય દિવ્યગઙ્ગાધરાય ચ ।
જગન્મયાય શર્વાય વૈદ્યનાથાય તે નમઃ ॥ ૭॥

કુજવેદવિધીન્દ્રાદ્યૈઃ પૂજિતાય ચિદાત્મને ।
આદિત્યચન્દ્રવન્દ્યાય વૈદ્યનાથાય તે નમઃ ॥ ૮॥

વેદવેદ્ય કૃપાધાર જગન્મૂર્તે શુભપ્રદ ।
અનાદિવૈદ્ય સર્વજ્ઞ વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૯॥

ગઙ્ગાધર મહાદેવ ચન્દ્રવહ્ન્યર્કલોચન ।
પિનાકપાણે વિશ્વેશ વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૦॥

વૃષવાહન દેવેશ અચિકિત્સચિકિત્સક ।
કરુણાકર ગૌરીશ વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૧॥

વિધિવિષ્ણુમુખૈર્દેવૈરર્ચ્યમાનપદામ્બુજ ।
અપ્રમેય હરેશાન વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૨॥

રામલક્ષ્મણસૂર્યેન્દુજટાયુશ્રુતિપૂજિત ।
મદનાન્તક સર્વેશ વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૩॥

પ્રપઞ્ચભિષગીશાન નીલકણ્ઠ મહેશ્વર ।
વિશ્વનાથ મહાદેવ વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૪॥

ઉમાપતે લોકનાથ મણિમન્ત્રૌષધેશ્વર ।
દીનબન્ધો દયાસિન્ધો વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૫॥

ત્રિગુણાતીત ચિદ્રૂપ તાપત્રયવિમોચન ।
વિરૂપાક્ષ જગન્નાથ વૈદ્યનાથ નમોઽસ્તુ તે ॥ ૧૬॥

ભૂતપ્રેતપિશાચાદેરુચ્ચાટનવિચક્ષણ ।
કુષ્ઠાદિસર્વરોગાણાં સંહર્ત્રે તે નમો નમઃ ॥ ૧૭॥

જાડ્યન્ધકુબ્જાદેર્દિવ્યરૂપપ્રદાયિને ।
અનેકમૂકજન્તૂનાં દિવ્યવાગ્દાયિને નમઃ ॥ ૧૮॥

ઇતિ શ્રીવૈદ્યનાથસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Vaidyanatha Stotram*

pdf was typeset on September 11, 2021

Please send corrections to *sanskrit@cheerful.com*